संस्कृतभारतम् ॥ॐ॥ समर्थभारतम्

# श्रीरामदेवबाबा-अभियांत्रिकी प्रबन्धनमहाविद्यालयः, नागपुरम्

# अनौपचारिक-संस्कृत-शिक्षण-केन्द्रम्

सञ्चालनम्

राष्ट्रिय-संस्कृत-संस्थानम्, नवदेहली

भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः

अहर्निशं सेवामहे संस्कृतराष्ट्राय


ॐ अजमल सुताय विदमहे
रामदेवाय धिमही
तन्नो तँवर प्रचोदयात
ॐ नमो भगवते नेतल नाथाय|
सकल रोग हराय सर्व सम्पती कराय|
मम मनोभिलाषित कार्य सिध्दाय|
ॐ नमो रामदेवाय नमः

।।श्रीरामदेवाय नमः ।।

# प्रज्ञा-केन्द्रस्य वार्षिकं वृत्तम्

## आवर्षं केन्द्रे-संचालितानां गतिविधीनां विवरणम्




2017-18

# उद्घाटनम् – मुख्यकेन्द्रस्य

28-08-2017

श्रीरामदेवबाबा अभियान्त्रिकी एवं प्रबन्धन–महाविद्यालये अनौपचारिक–संस्कृत–शिक्षण–केन्द्रस्य उद्घाटनम् सप्तदशोत्तरद्विसहस्रतमवर्षस्य अगस्तमासस्य अष्टाविंशतौ अभवत्। केन्द्रस्य उद्घाटनावसरे मुख्यातिथिरूपेण समुपस्थिताः आसन् संस्कृतभाषा–प्रचारिणी–सभायाः मुख्याः श्रीमन्तः चन्द्रगुप्तवर्णेकरमहाभागाः। विशिष्टातिथिरूपेण रामदेवबाबा–महाविद्यालस्य द्वितीयसत्रस्य अधीष्ठाता श्रीसतीशमोहगावकरमहोदयः समुपस्थितः आसीत्। कार्यक्रमस्य अध्यक्षरूपेण रामदेवबाबा–महाविद्यालयस्य महासचिवः श्रीगोविन्दलाल–अग्रवाल–महोदयः उपस्थितः आसीत्। कार्यक्रमेऽस्मिन् सर्वेऽपि अतिथयः ‘किमर्थम् आधुनिक–युगे संस्कृतम्’ इति विषयं लक्षीकृत्य स्वमतम् उपस्थापितवन्तः। कार्यक्रमे महाविद्यालस्य छात्राः प्राध्यापकाः केचन च सामाजिकाः उपस्थिताः आसन् ।

प्रमुखातिथिः
डा. चन्द्रगुप्तवर्णेकरः
संस्कृतभाषा-प्रचारिणी-सभा
नागपुरम्







# उद्घाटनम् – उपकेन्द्रस्य ‘श्रीदेवनाथवेद-विद्यालयः’

मुख्यकेन्द्रात् द्वादशकिलोमिटर्-दूरं वंजारीनगरम् इति नाम्ना नागपुरमहानगरस्य उपनगरे श्रीदेवनाथसंस्कृत-वेद-विद्यालये अनौपचारिक-संस्कृत-शिक्षणस्य उपकेन्द्रस्य उद्घाटनं जातम् । श्रीदेवनाथ-वेद-विद्यालय-सम्बद्धाधानां सामाजिक-जनानाम् अपि संस्कृतमध्येतुम् इच्छा समुत्पन्ना जाता । अतः स्थानीये स्तरे सम्पर्कद्वारा तस्मिन् नगरे एकस्य उपकेन्द्रस्य उद्घाटनं कृतम् । एतस्मिन् कार्यक्रमे मुख्यातिथि रूपेण संस्कृतभारत्याः अखिलभारतीय-महामन्त्री श्रीश्रीशदेवपूजारीमहोदयः अन्ये च संस्थासम्बद्धाः जनाः उपस्थिताः आसन्। कार्यक्रमे भागग्रहितृषु व्यवसायिकाः , चिकित्सकाः , सेवानिवृत्ताः , कर्मकाण्डी-ब्राह्मणाः , भिन्न-भिन्न-क्षेत्रेषु वृत्तिं कुर्वाणाःसामाजिकाः, केचन वेदपाठीछात्राश्चोपस्थिताः आसन् । श्रीश्रीदेवपूजारीमहोदयः सामाजिकानां मार्गदर्शनं कुर्वन् संस्कृतस्य महत्वं प्रतिपादितवान् ।

17-09-2017

# उपकेन्द्रस्य उद्घाटनम्



प्रमुखातिथिः
श्रीश्रीशदेवपुजारी
अखिल-भारतीय-महामन्त्री,
संस्कृतभारती



# प्रचारः प्रसारः सम्भाषण-शिविरं च -

अगस्तमासस्य नवदिनांके केन्द्रं प्रति प्राप्तेः समनन्तरमेव प्रचारकार्यम् आरब्धम् आसीत्। प्रचारोपक्रमेषु अस्माकं मुख्योपक्रमः जीवितसम्पर्कः आसीत्। वयं प्रतिकक्षां गत्वा छात्रैः सह सम्पर्कं कृतवन्तः, प्राध्यापकगणेषु प्रतिव्यक्तिं गत्वा वयं सम्पर्कं कृतवन्तः। न केवलं छात्रैः सह अपितु महाविद्यालयस्य विभिन्नैः कर्मचारिभिः सह अपि सम्पर्कः कृतः।

09-07-2017 → 20-09-2017

## E-सम्पर्कः

वारं वारं स्मारयितुं प्रेरयितुं च महाविद्यालयस्य कार्यालयीन–सन्देश–तन्त्र–माध्यमेन अपि E-सम्पर्कः कृतः।

## सामाजिक–सम्पर्कः

सामाजिकस्तरे सम्पर्कार्थं राष्ट्रिय–स्वयं सेवक–संघस्य सहयोगः प्राप्तः । शाखामाध्यमेन बहुभिः कार्यकर्तृभिः सह सम्पर्कः कृतः।

# सम्भाषण-शिविरम्

अष्टाविंशतौ उद्घाटनात् परं सम्भाषण-शिविरस्य आयोजनं जातम्। एतस्मिन् शिविरे उपत्रिंशत् छात्राः प्राध्यापकाश्च सोत्साहं भागम् अवहन्।

अस्मिन्नेव काले संस्कृतभाषा-प्रमाणपत्रीय-पाठ्यक्रमस्य कृते पंजीकरणकार्यम् आरब्धम् ।

29-08-2017 → 20-09-2017

# श्रीमद्भगवद्गीता-वितरणम् -

विज्ञाने गीतायाः अतीव-महत्त्वं वर्तते इति प्रायः सर्वे जानन्ति एव। महाविद्यालयस्य महासचिवमहोदयस्य इयं प्रबला इच्छा अस्ति यत् महाविद्यालये छात्राः प्रबन्धनाभियान्त्रिकी-पाठ्यक्रमैः सह गीताध्ययनमपि कुर्युः इत्यतः तेन संस्कृत-केन्द्रे सरलसंस्कृतस्य अभ्यासं कुर्वद्भ्यः सर्वेभ्यः छात्रेभ्यः श्रीमद्भगवद्गीता वितीर्णा ।

28-08-2017



श्रीमद्भगवद्गीता-वितरणम्

# श्लोकोच्चारणं स्तोत्रकण्ठस्थीकरणं च

केन्द्रे सरल-संस्कृताभ्यासं कुर्वन्तः छात्राः प्राध्यापकाः च संस्कृतस्य उच्चारणे काठिन्यम् अनुभूतवन्तः । उच्चारणदोषाणां निवारणाय सर्वेषां सहमतिद्वारा श्लोकोच्चारणं स्तोत्रकण्ठस्थीकरणं च आरब्धम् । कक्ष्यायाः अन्तिम-सप्तनिमेषाः एतदर्थं संरक्षिताः । अनेन श्लोकोच्चारणेन छात्राणाम् उच्चारणे महत् परिवर्तनम् आगतम्। । स्तोत्राणां लयबद्धगानेन सर्वे अपि आकृष्टाः अभवन् । शिवपंचाक्षरस्तोत्रम् , अच्युताष्टकम् इत्यादीनां स्तोत्राणाम् इतरश्लोकानां च गानं भवति स्म । कार्यक्रमस्य उद्देश्यः सफलः जातः ।

# सम्भाषण-शिविरं संस्कृत-जनपद-सम्मेलनं च -

26-12-2017 ततः 06-01-2018

नागपुर-महानगरे संस्कृतभारतीद्वारा जनवरीमासस्य सप्तदिनांके संस्कृत-जनपद-सम्मेलनस्य आयोजनं कृतम्। एतस्मात् पूर्वं वातावरण-निर्माणाय आयोजन-स्थले ( LAD-महाविद्यालये) एकस्य संस्कृत-सम्भाषण-शिविरस्य आयोजनं जातम् । इदं च शिविरं दिसेम्बर्मासस्य २६-दिनांकतः जनवरीमासस्य षड्दिनांकपर्यन्तं जातम् । एल-ए-डी-महाविद्यालयस्य उपत्रिंशत् छात्राः एतस्मिन् शिविरे भागम् ऊढ्वा सरलसंस्कृतस्य अभ्यासं कृतवत्यः न केवलं तावदेव अपितु संस्कृत-जनपद-सम्मेलनस्य विभिन्नकार्यक्रमेषु सक्रियरूपेण भागमपि ऊढवत्यः ।




एल.ए. डी.महाविद्यालये

सम्भाषण–शिविरस्य दृश्यम्

# होलीमेलनम् -

06-03-2018

होलिकोत्सवस्य अवसरे सर्वे केन्द्रछात्राः प्राध्यापकाः च एकत्रिताः अभवन्। प्रज्ञा–केन्द्रे रंगपंचमीदिने अस्य कार्यक्रमस्य आयोजनं जातम् । एतस्य वर्णोत्सवस्य केचन स्मृति–अंशाः चित्रेषु उत्कीर्णाः कृताः अस्माभिः



होलिकोत्सवे पर्वाचरणं
कुर्वन्तः केन्द्र-छात्राः



# नूतनवर्षाभिनन्दनम् –

चैत्र–शुक्लप्रतिपदि अपि एकः अभिनन्दनकार्यक्रमः आयोजितः ।
संस्कृतच्छात्राणां पुनरपि मेलनस्य एकः अवसरः प्राप्तः ।
कार्यक्रमे सर्वे परस्परं नवसंवत्सरस्य शुभकामनाः दत्तवन्तः।

18-03-2018



# मौखिकी परीक्षा

अनौपचारिक–संस्कृत–शिक्षण–केन्द्रे प्रथम–दीक्षा पाठ्यक्रमं पठतां छात्राणां **मौखिकी परीक्षा** एप्रिल्–मासस्य **13-04-18 , 15-04-18 , 16-04-18** एतेषु दिनांकेषु द्वयोः केन्द्रयोः आयोजिता ।

# मौखिक-परीक्षायाः मूल्याङ्कन-बिन्दवः

१. धारा-प्रवाहिता

२. शुद्धता

३. प्रतिस्पन्दः

४. अनुवर्तनम्

५. विशेषः

वि
का
सः

कु
चु
टु
तु
पु





मौखिक-परीक्षायां

छात्राः





# मुख्य–परीक्षा

21-04-2018

29-04-2018

संस्थानेन निश्चितयोः दिनांकयोः छात्राणां प्रथम–दीक्षायाः मुख्य–परीक्षा सम्पन्ना । आहत्य पंचषष्टिः छात्राः परीक्षां लिखिवन्तः ।

द्वयोः केन्द्रयोः छात्राः रामदेवबाबा महाविद्यालये परीक्षां लिखितवन्तः । प्रथमवारं संस्कृतप्रश्नपत्रस्य उत्तराणि संस्कृतेन लिखिवन्तः छात्राः महान्तं सन्तोषम् अनुभूतवन्तः । तेषां मनस्सु किंचिद् वा भयम् अपि आसीत्।



परीक्षां लिखन्तः छात्राः

सत्रम् 2017-18



# समारोप–कार्यक्रमः

## सत्रम्- 2017-18

अनौपचारिक-संस्कृत-शिक्षण-केन्द्रस्य २०१७-१८ सत्रस्य समारोप-कार्यक्रमः अपैल्-मासस्य पंचविंशतिः दिनांके अभवत्। समारोप-कार्यक्रमे विश्वमांगल्य-सभायाः अखिल-भारतीय-सेवा-प्रमुखा माननीया मृणालिनी वाघमारे महोदया मुख्यातिथि रूपेण आमन्त्रिता आसीत् । महाविद्यालयस्य महासचिवः श्रीगोविन्दलाल-अग्रवालः अध्यक्ष-रूपेण कार्यक्रमे समुपस्थितः आसीत् । महाविद्यालयस्य प्राचार्यस्य विशेषोपस्थितिः आसीत् । मुखातिथिः मा. मृणालिनी वाघमारे तन्त्रशिक्षणे संस्कृतस्य महत्वं प्रतिपादितवती। प्राचार्येण अपि तन्त्रशिक्षणे संस्कृतस्य महत्त्वं लक्षीकृतम्, न केवलं तावदेव अपि तु अग्रिमवर्षे छात्राणां कृते संस्कृतं स्वेच्छिक-विषय रूपेण कर्तुम् उद्घोषणा कृता ।समारोप-कार्यक्रमे उपषष्टिः जनाः उपस्थिताः आसन्

कार्यक्रमस्य संचालनं केन्द्र-छात्रैः संस्कृतेन कृतम्।

# समारोप-कार्यक्रमे अतिथयः

25-04-2018



मृणालिनी-वाघमारे महोदयायाः
सत्कारं कुर्वाणः महासचिवः
श्रीगोविन्दलाल-अग्रवालः





कार्यक्रमे उपस्थिताः अतिथयः

अच्युताष्टकं गायन्तः छात्राः





कार्यक्रमे भाषमाणः
कार्यक्रमाध्यक्षः
समुपस्थिताः जनाः च



# प्रज्ञा-सन्देशः

## वार्षिकाङ्कः

## 2017-18

महाविद्यालयस्य वार्षिक-पत्रिका-Arceon अस्यां प्रथमवारं संस्कृत-विभागः निर्मियते । एतस्मिन् कार्ये महाविद्यालयस्य महासचिवानां श्रीमतां गोविन्दलाल-अग्रवाल-महोदयानाम्, महाविद्यालयस्य प्राचार्याणां श्रीराजेशपाण्डेवर्याणां अनौपचारिकसंस्कृत-शिक्षण-केन्द्राधिकारिणां प्रा.श्रीमतां भालचन्द्रहरदास-महोदयानाम् , प्रकाशन-प्रमुखायाः प्रा. गायत्रीमहोदयायाः अन्येषां प्रकाशनसम्बद्ध-छात्राणां विशेष-सहयोगः प्राप्तः।

21-03-2018

# संस्कृतशिक्षण–तन्त्रशिक्षणयोः समन्वयार्थं महाविद्यालय–पक्षतः राष्ट्रिय–संस्कृत–संस्थानस्य अष्टादशी–योजनायाः कृते अपि आवेदनं कृतं वर्तते

तत्र विषयचयनम् एवं प्रकारेण कृतम् –

- Technology Adaptation Project

- Computer Education Project

21-04-2018



संस्कृत-केन्द्रस्य छात्राः

# प्रचारमाध्यमेषु प्रज्ञा-केन्द्रम्

## उद्घाटनम्

29-08-2017



FROM THE COLLEGES

Shri Ramdeobaba College of Engg & M



'श्री रामदेवबाबा 'मध्ये संस्कृत प्रशिक्षण

संस्कृत सामान्यजनांची भाषा व्हावी : श्रीश देवपुजारी

श्रीदेवनाथ संस्कृत प्रशिक्षण केंद्राचे उद्घाटन



'संस्कृत' सामान्यजणांची भाषा व्हावी : श्रीश देवपुजारी

। श्रीदेवनाथ संस्कृत प्रशिक्षण केंद्राचे उद्घाटन



# संस्कृत व तंत्रज्ञानाचा समन्वय व्हावा : वाघमारे

**रामदेवबाबामध्ये संस्कृत केंद्राचे सत्रावसान**

◆ नागपूर, २७ एप्रिल

देववाणी संस्कृतमध्ये ज्ञानाचा अनमोल खजिना साठलेला आहे. हा खजिना जनसामान्यांपर्यंत पोहोचविण्यासाठी संस्कृत आणि तंत्रज्ञान यांचा समन्वय व्हावा असे प्रतिपादन विश्वमांगल्य सभेच्या अखिल भारतीय सेवा प्रमुख मृणालिनी वाघमारे यांनी केले.

राष्ट्रीय संस्कृत संस्थान, दिल्लीतर्फे संचालित रामदेवबाबा अभियांत्रिकी महाविद्यालयातील अनौपचारिक संस्कृत प्रशिक्षण केंद्राच्या २०१७-१८ शैक्षणिक सत्राचा सत्रावसान कार्यक्रम नुकताच संपन्न झाला. त्यावेळी प्रमुख अतिथी म्हणून मृणालिनी वाघमारे तर, महाविद्यालयाचे महासचिव गोविंदलाल अग्रवाल कार्यक्रमाच्या अध्यक्षस्थानी होते. यावेळी व्यासपीठावर प्राचार्य डॉ राजेश पांडे, केंद्राधिकारी प्रा. भालचंद्र हरदास आणि संस्कृत प्रशिक्षक प्रा. चंद्रमोहन गोयल उपस्थित होते. चंद्रमोहन गोयल यांनी संस्कृत केंद्राच्या वार्षिक वृत्ताचे सादरीकरण केले. संस्कृत केंद्राने राबविलेले विविध उपक्रम आणि आगामी योजनांची विस्तृत माहिती गोयल यांनी दिली. प्राचार्य डॉ. पांडे यांनी संस्कृत भाषा ही वैश्विक असल्याने अधिकाधिक विद्यार्थ्यांनी संस्कृत संस्थानच्या या अभिनव उपक्रमाचा लाभ घेण्याचे आवाहन केले. आपल्या अध्यक्षीय भाषणात गोविंदलाल अग्रवाल यांनी संस्कृत भाषा हा भारतीय संस्कृतीचा आत्मा आहे. म्हणूनच प्रत्येक भारतीयाने संस्कृत भाषा प्रचारार्थ थोडा वेळ द्यावा असे आवाहन केले. यावेळी महाविद्यालयातील संस्कृत केंद्राच्या विद्यार्थ्यांनी गीत गायन, मंत्रोच्चार, अनुभव कथन इ. सादर केले. कार्यक्रमाचे संस्कृत सूत्रसंचालन ओजस्वला पाठक आणि पूनम जैन यांनी केले. केंद्राधिकारी प्रा. भालचंद्र हरदास यांनी आभार प्रदर्शन केले. कल्याणमंत्राने कार्यक्रमाची सांगता झाली.

(तभा वृत्तसेवा)

दिनांक: 28-04 2018

## तरूण-भारत

## समापनम्



# 'संस्कृतचा व्हावा तंत्रज्ञानाशी समन्वय'

म.टा. प्रतिनिधी, नागपूर

**रामदेवबाबा कॉलेजच्या सत्राचा समारोप**

देववाणी संस्कृतमध्ये ज्ञानाचा अनमोल खजिना साठलेला आहे. हा खजिना जनसामान्यांपर्यंत पोहोचविण्यासाठी संस्कृत आणि तंत्रज्ञान यांचा समन्वय व्हावा, असे मत विश्वमांगल्य सभेच्या अखिल भारतीय सेवा प्रमुख मृणालिनी वाघमारे यांनी व्यक्त केले.

राष्ट्रीय संस्कृत संस्थान, दिल्लीद्वारा संचालित रामदेवबाबा इंजिनीअरिंग कॉलेजमधील अनौपचारिक संस्कृत प्रशिक्षण केंद्राच्या २०१७-१८ शैक्षणिक सत्राचा नुकताच समारोप झाला. प्रमुख अतिथी म्हणून मृणालिनी वाघमारे उपस्थित होत्या. रामदेवबाबा इंजिनीअरिंग कॉलेजचे महासचिव गोविंदलाल अग्रवाल कार्यक्रमाच्या अध्यक्षस्थानी होते. व्यासपीठावर प्राचार्य डॉ. राजेश पांडे, केंद्राधिकारी प्रा. भालचंद्र हरदास आणि संस्कृत प्रशिक्षक प्रा. चंद्रमोहन गोयल उपस्थित होते.

चंद्रमोहन गोयल यांनी संस्कृत केंद्राच्या वार्षिक वृत्ताचे सादरीकरण केले. संस्कृत केंद्राने राबविलेले विविध उपक्रम आणि आगामी योजनांची विस्तृत माहिती गोयल यांनी दिली. प्राचार्य डॉ. पांडे यांनी संस्कृत भाषा ही वैश्विक असल्याने अधिकाधिक विद्यार्थ्यांनी संस्कृत संस्थानच्या या अभिनव उपक्रमाचा लाभ घेण्याचे आवाहन केले. आपल्या अध्यक्षीय भाषणात गोविंदलाल अग्रवाल यांनी संस्कृत भाषा ही भारतीय संस्कृतीचा आत्मा असल्याचे सांगत, प्रत्येक भारतीयाने संस्कृत भाषा प्रचारार्थ वेळ द्यावा, असे आवाहन केले. यावेळी महाविद्यालयातील संस्कृत केंद्राच्या विद्यार्थ्यांनी गीतगायन, मंत्रोच्चार, अनुभवकथन सादर केले. कार्यक्रमाचे संचालन ओजस्वला पाठक आणि पूनम जैन यांनी केले. केंद्राधिकारी प्रा. भालचंद्र हरदास यांनी आभार मानले. कल्याणमंत्राने कार्यक्रमाची सांगता झाली.

## महाराष्ट्र-टाईम्स

दिनांक: 27-04 2018

दिनांकः 27-04 2018

# दैनिक-भास्कर

## संस्कृत व तंत्रज्ञान में हो समन्वय : वाघमारे



नागपुर। संस्कृत भाषा में ज्ञान का अनमोल खजाना है, इसे जनसामान्य तक पहुंचाने के लिए संस्कृत और तंत्रज्ञान में समन्वय होना चाहिए। यह विचार अखिल भारतीय सेवा प्रमुख मृणालिनी वाघमारे ने व्यक्त किए। हाल ही में राष्ट्रीय संस्कृत संस्थान, दिल्ली द्वारा संचालित रामदेवबाबा अभियांत्रिकी महाविद्यालय में अनौपचारिक संस्कृत प्रशिक्षण केंद्र के शैक्षणिक सत्र का समापन हुआ।

समारोह में बतौर प्रमुख अतिथि मृणालिनी वाघमारे, रामदेवबाबा अभियांत्रिकी महाविद्यालय के महासचिव गोविंदलाल अग्रवाल, प्राचार्य डा. राजेश पांडे, केंद्राधिकारी प्रा. भालचंद्र हरदास व संस्कृत प्रशिक्षक प्रा. चंद्रमोहन गोयल आदि उपस्थित थे। दीप प्रज्वलन के बाद चंद्रमोहन गोयल ने संस्कृत केंद्र की वार्षिक गतिविधि, विविध उपक्रम तथा आगामी योजनाओं की जानकारी दी। संस्कृत भाषा वैश्विक स्तर पर जानी जाती है, अधिक से अधिक छात्रों ने संस्कृत संस्थान के उपक्रम का लाभ लेने का आह्वान प्रा. पांडे ने किया। संस्कृत भाषा भारतीय संस्कृति की आत्मा है, सभी ने संस्कृत के प्रचार-प्रसार के लिए प्रयास करने की अपील गोविंदलाल अग्रवाल ने की। महाविद्यालय के संस्कृत केंद्र के छात्रों ने गीत, मंत्रोच्चार, अनुभव कथन आदि की प्रस्तुति दी। संचालन ओजस्विता पाठक व पूनम जैन ने तथा आभार केंद्राधिकारी प्रा. भालचंद्र हरदास ने माना।



प्रज्ञा-केन्द्रस्य छात्रैः सह महाविद्यालयस्य महासचिवः - श्रीगोविन्दलाल-अग्रवालः , प्राचार्यः श्रीराजेशपाण्डे

# श्वासे-श्वासे रोमसु धमनीषु संस्कृत-वीणा-क्वणनम्

# सङ्ख्यात्मकः सारांशः

# वृत्तसारः

## केन्द्रम् –श्रीरामदेवबाबा अभियान्त्रिकी एवं प्रबन्धन–महाविद्यालयः

## नागपुरम्

केन्द्राधिकारी – प्रा. श्रीभालचन्द्रहरदासः

केन्द्रशिक्षकः – चन्द्रमोहनगोयलः

उद्घाटन–दिनांकः – **28-08-2017**

उपस्थितिः – डा.श्रीचन्द्रगुप्तवर्णेकरः, श्रीगोविन्दलाल–अग्रवालः, डा.श्रीसतीशमोहगावकर।

# पाठ्यक्रमः

## संस्कृत-भाषा प्रमाणपत्रीय-पाठ्यक्रमः।

केन्द्र-सङ्ख्या - 2

## मुख्यकेन्द्रम्

श्रीरादेवबाबा अभियान्त्रिकी एवं प्रबन्धन-महाविद्यालयः

## उपकेन्द्रम्

श्रीदेवनाथ-वेदविद्यालयः वंजारीनगरम्

# छात्र-सङ्ख्या –

मुख्यकेन्द्रे – 40 उपकेन्द्रे 58 आहत्य -- 98

# वर्गसंख्या

मुख्यकेन्द्रे – 04 उपकेन्द्रे – साप्ताहिकी कक्षा

# वर्ग-विश्लेषणम्

| | | | |
|---|---|---|---|
| प्राध्यापकाः – | 15 | सामाजिकाः – | 35 |
| वैदिक-छात्राः – | 23 | अभियान्त्रिक-छात्राः – | 25 |
| महिलानां संख्या – | 34 | पुरुषाणां संख्या – | 64 |

# वार्षिक-गतिविधयः

## सम्पर्कः

उद्घाटनम्

सम्भाषण-शिविरम्

भगवद्गीता-वितरणम्

श्लोकोच्चारणं स्तोत्रकण्ठस्थीकरणं च

सम्भाषण-शिविरं जनपद-संस्कृत-सम्मेलनं च

होलीमेलनम्

नूतनवर्षाभिनन्दनम्

लिखित–परीक्षणम्

मौखिक–परीक्षणम्

मुख्य–परीक्षा

समापन–कार्यक्रमः

छात्रैः सह अनौपचारिकी चर्चा, भोजोत्सवः च आवर्षम्...




छात्रैः सह संघ-स्वयंसेवकैः सह च भोजनस्य दृश्यम्



# छात्रोपस्थिति-विवरणम्

## पत्रं संलग्नं वर्तते।

| नियमितता | भाषाविकासः | प्रतिस्पन्दः |
|---|---|---|
| अस्ति | सम्यक् | उत्तमः |
| नास्ति | सामान्यः | सामान्यः |
| | नास्ति | नास्ति |

# मौखिक–परीक्षा विवरणम्

उपस्थिताः -- 40

सम्भाषणशीलाः –14

प्रयासरताः – 26

प्रश्नावलिः संलग्ना वर्तते।

# मुख्य–परीक्षा–विवरणम्

परीक्षा–दिनांकः

21-04-2018 शनिवासरः, 29-04- 2018 रविवासरः

परीक्षा–केन्द्रम्

श्रीरामदेवबाबा अभियान्त्रिकी एवं प्रबन्धन–महाविद्यालयः नागपुरम्

शनिवासरे अपेक्षिताः – 77

उपस्थिताः – 63

रविवासरे अपेक्षिताः – 04

उपस्थिताः – 01

आहत्य अपेक्षिताः – 81

आहत्य उपस्थिताः 64

# समापन-विवरणम्

25-04-2018 RCOEM नागपुरम्

## उपस्थितिः

मुख्यातिथिः मा. मृणालिनी वाघमारे

अध्यक्षः श्रीगोविन्दलाल-अग्रवालः

डा.श्रीराजेशपाण्डे - प्राचार्यः

केन्द्राधिकारी - प्रा. श्रीभालचन्द्रहरदासः।

# समारोप-कार्यक्रमः

## उपस्थितानां संख्या 60

## सामाजिकाः 25

## महाविद्यालयीनः 35

## कार्यक्रमे विशेषः

केन्द्र-छात्रैः कार्यक्रमः संस्कृतेन संचालितः।

कैश्चित् स्वानुभवः उक्तः ,कैश्चित् स्तोत्र-पाठः कृतः ।

# प्रशिक्षकस्य (चन्द्रमोहनस्य) कार्याणि

कक्ष्यायाः पूर्वसज्जता

छात्रोपस्थितिः

कक्ष्या–संचालनम्

छात्राणां भाषा–विकासस्य परीक्षणम्

संस्कृत–भारत्याः मार्गदर्शने संस्कृत–प्रचार–कार्यम्

सामाजिक–सम्पर्कः

स्वाध्यायः, संगीताभ्यासः च

श्रीरामदेवबाबा अभियान्त्रिकी एवं प्रबन्धन-महाविद्यालयेन स्व-जालपुटे संस्कृत-विभागः निर्मितः

तस्य संकेतः अस्ति

http://rknec.edu/Academics/Departments/Sanskrit.aspx

।।भवतां सर्वेषां अत्र स्वागतं वर्तते।।